# समासे अद्वैतसङ्कल्पः

Smt. A. P. VASANTHAKUMARI,
SELECTION GRADE LECTURER IN SANSKRIT,
SREE SANKARA COLLEGE, KALADY.

नानात्वे एकत्वमित्येव ह्यद्वैतवेदान्तसारांशः। प्रकृत्यां दृश्यमाने सर्वस्मिन्नपि वस्तुनि द्वैतभावो द्रष्टुं शक्यते। तथा हि नानाजलबिन्दूनामद्वैतभाव एव वृष्टिरित्युच्यते। शाखामूलपत्रकुसुमफलादीनां विविधावयवानामेकीभावः भवति वृक्षः। हि बहूनां कक्ष्याणां समष्टिः विद्यालयः। कक्ष्या तु अनेकेषां छात्राणां समूहः। एवमस्मिन् प्रपञ्चे एकैकस्मिन्नपि वस्तुनि अद्वैतभावोऽस्तीति वक्तुं शक्यते। अद्वैतवेदान्ते तु सर्वेषां जीवात्मनामैक्यमेव परमात्मेत्युच्यते। अद्वैतवेदान्तिनः परमात्मानमेवाद्वैतरूपेण परिपश्यन्ति चेद्वैयाकरणाः शब्दब्रह्म एव। उभयत्रापि नामरूपादिभेदो नास्ति।

वेदेषूपनिषत्सु च प्रतिपादितं ब्रह्मतत्त्वमेव पश्चाद्बादरायणादिभिः ऋषिवर्यैः अद्वैतवेदान्तदर्शनरूपेण विकासः प्रापितः। अस्य सारांश एव वैयाकरणैः शब्दब्रह्मसङ्कल्परूपेण स्वांशीकृतः। एतदेव प्रकाशितं वाक्यपदीयब्रह्मकाण्डे भर्तृहरिणा-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।। इति।

अद्वैतवेदान्ते यद्विवर्तभावः अङ्गीक्रियते तदेव व्याकरणे शब्दार्थयो मिथः सम्बन्ध इति भर्तृहरिः अनेन श्लोकेन प्रकाशयति। शब्दानां विवर्त एव अर्थभावेन प्रकाश्यते- 'अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदीरितः।' इति विवर्तलक्षणं व्याकरणशास्त्रेऽपि सङ्गतमिति द्रष्टुं शक्यते।

पूर्वोक्तः अद्वैतभावः व्याकरणशास्त्रस्थसमासेऽपि सर्वथा प्रसक्तः। समसनं हि समासः। एकार्थीभाव इति यावत्। अनेकघटकपदानि सम्यक् मिलित्वा एकपदं भवतीत्यस्मिन्नर्थेऽद्वैतभावो भवति। समस्तपदेष्वेकार्थीभावसामर्थ्यम्, एकविभक्तित्वम्, एकस्वरविशिष्टत्वम् इत्यादिस्वभावविशेषदर्शनादर्थविषये, विभक्तिविषये, स्वरविषये च सर्वत्रैक्यरूपात्मकमद्वैतभावं पश्यामः।

अव्ययीभावः, तत्पुरुषः, द्वन्द्वः, बहुव्रीहिरिति सामान्येन चतुर्विधाः समासाः इत्यभिप्रयन्ति वैयाकरणाः। प्रायेण पूर्वपदार्थप्रधानः अव्ययीभावः। प्रायेणोत्तरपदार्थप्रधानः तत्पुरुषः। प्रायेणोभयपदार्थप्रधानः द्वन्द्वः। प्रायेणान्यपदार्थप्रधानः बहुव्रीहिः। समासे अनेकघटकपदानि ऐकपद्यं प्राप्नुवन्तीति हेतोः तत्राद्वैतभावः स्पष्टः एव।

प्रायेण पूर्वपदस्याव्ययत्वं तस्यार्थस्य प्राधान्यञ्च भवति चेत् सोऽव्ययीभावसमासः। 'अव्ययीभावश्च' इत्यनेन तस्य नपुंसकत्वमेकवद्भावश्च विधीयते। सोऽयं एकवद्भाव एवाद्वैतस्वभावं सूचयति। एवम् 'अधिगोपम्' इत्याद्युदाहरणेषु अद्वैतभावं पश्यामः। इह अधि इत्यव्ययं गोप इति नामशब्दश्च मिलित्वा 'अधिगोपम्' इति एकपदं सिद्ध्यति। इह पदानामद्वैतभावो द्रष्टुं शक्यते।

उत्तरपदार्थप्रधानः तत्पुरुषः। अत्रापि अनेकपदानि एकपदत्वमुपपद्यन्ते। एकमेवार्थं बोधयति च। राजपुरुषः इत्युक्ते राजा अन्यः, पुरुषश्च अन्य इति विभिन्नार्थे न, किन्तु राजसम्बन्धी पुरुष इति एकार्थमेव सूचयति।

संख्यापूर्वो तत्पुरुषः द्विगुः। पञ्चगवम् इत्युदाहरण्म्। पञ्चानां गवां समाहार इति लौकिकविग्रहः। अत्र 'द्विगुरेकवचनम्' इति एकवद्भावविधानादस्मिन् समासे अद्वैतभावः प्रकटतरः।

कृष्णश्रितः इत्यादिद्वितीयातत्पुरुषे, शङ्कुलाखण्ड इत्यादितृतीयातत्पुरुषे, यूपदारु इत्यादिचतुर्थीतत्पुरुषे, चोरभयम् इत्यादिपञ्चमीतत्पुरुषे, राजपुरुष इत्यादिषष्ठीतत्पुरुषे, अक्षशौण्ड इत्यादिसप्तमीतत्पुरुषे च सर्वत्र विभक्तिप्रत्ययानां लोपः भूत्वा ऐकपद्यमेकार्थीभावश्च सिद्ध्यति।

महाराज इत्यादिकर्मधारयसमासेषु उत्तरपदार्थप्राधान्यमस्ति। अत्रापि पूर्वोक्तः एकार्थीभावः एकविभक्तित्वं स्वरैक्यञ्च स्पष्टमेव।

अब्राह्मणप्रभृतिषु नञ्समासेषु एतदद्वैतभावः अतीव स्पष्ट एव।

इतरेतरद्वन्द्वे तु अद्वैतभावः यदि न स्पष्टः तथापि शब्दानामर्थप्राधान्यविषये तेषां समानता अस्तीति हेतोः अद्वैतभावः निगूढः भवति। किन्तु समाहारद्वन्द्वस्य एकवद्भावः विहितः इति हेतोः स्पष्ट एवाद्वैतभावः स्वरूपेण। रामौ पितरौ इत्याद्येकशेषसमासे तु यद्यपि एकवद्भावः नास्ति तथापि एकपदमवशिष्यते।

प्रायेणान्यपदार्थप्रधानो बहुव्रीहिः। अन्यपदार्थे वर्तमानानामनेकप्रथमान्तानां समासः बहुव्रीहिः। इहानेकप्रथमान्तानामद्वैतमेवान्यपदार्थः। पीतम् अम्बरं यस्य सः पीताम्बरः। अत्र पीतम्, अम्बरम् इत्येते पदे एकीभूय कृष्ण इत्यर्थं बोधयतः।

वेदान्ते यदा अज्ञानं बाध्यते तदैव अद्वैतभावो अतीव प्रकटो भवति। व्याकरणशास्त्रे तु समासविषये प्रायेण धातोः प्रातिपदिकस्य चावयवभूतानां सुपां लोपेन, एकविभक्तित्वं विधाय च भिन्नभिन्नपदानामैकपद्यं सिद्ध्यति। कण्ठे काल इत्याद्यलुक्समासे तु सुबां न लोपः इति हेतोः ते प्रत्युदाहरणाः एव। तथापि तत्र कश्चिदेकस्यापि सुपः लुक् भवत्येव इति हेतोः एकार्थीभावो सिद्ध्यत्येव इति वक्तुं शक्यते।

व्यावहारिकदशायां द्वैतभाव एव प्रकटः। तथापि पारमार्थिकदशायामद्वैतभाव एव। प्रायेण समासाः विकल्पाः। विकल्पे समासाभावपक्षे अथवा समासात्प्राक् च तेषामेकार्थीभावो यद्यपि नास्ति तथापि समासानन्तरं तेषामेकार्थीभावरूपोऽद्वैतभावो अस्त्येव। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति हि वक्यपदीयकारस्योक्तिः।

जीवन्मुक्तः यथा मनुष्यपश्वादिनानावस्तुषु चैतन्यरूपाद्वैतभावो पश्यति तथा वैयाकरणः समस्तपदेषु घटकपदान् प्रत्येकं न पश्यन् समस्तरूपं शब्दब्रह्मणः प्रकटितरूपत्वेन पश्यति।

जीवन्मुक्तः सकलभेदभावानतीत्य प्राणान्परब्रह्मणि विलीय मोक्षमानन्दैकरसमनुभवति। तदनन्तरं सः ब्रह्मभावं प्राप्नोति च। ब्रह्मवित् ब्रह्मैव भवति इति हि श्रुतिः। तथैव वैयाकरणः मात्रालाभेन पुत्रलाभः इत्याशयं पुरस्कृत्य भिन्नभिन्नपदानां प्रयोगं न कृत्वा समस्तपदान् प्रयुज्य शब्दब्रह्म एव अद्वैतभावरूपेण धर्मार्जनेन पुण्यसम्पादनं कृत्वा मोक्षमनुभवति।

समग्रसमष्टिसमुदायेष्विव समासेऽपि अद्वैतभावो द्रष्टुं शक्यते। भेदद्वारेण प्राप्यमानाभेद एवाद्वैतभावः। कार्यमेतत् व्याकरणशास्त्रे स्फुटतया प्रतिपादितमस्ति।